The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

# भाषाविज्ञानदृष्ट्या समासप्रकरणे पाणिनिना प्रयुक्तानां केषाञ्चित् पारिभाषिकशब्दानां तुलनात्मकमध्ययनम्

**शुभश्रीसुचरिताइन्दुरेखा नायक**
अध्यापिका गवेषिका च
वाङ्की स्वयंशासित महाविद्यालयः, वाङ्की, कटकम्, ओडिशा

**सारांशः -**

व्युत्पत्तिशास्त्रमपि कोषविज्ञाने अन्तर्गतमस्ति। शब्दविज्ञानमर्थविज्ञान-कोषविज्ञानं च आधारीकृत्य अष्टाध्यायाः समासप्रकरणे प्रयुक्तानां केचन पारिभाषिकश्लिष्ट-शब्दानामध्ययनं क्रियते अत्र । समासप्रकरणे पाणिनिना प्रयुक्तानां पारिभाषिक श्लिष्टशब्दानां भाषाविज्ञानदृष्ट्या साम्प्रतिकसमयेन लोकव्यवहारेण च सह तथा अन्यभाषाशास्त्रेण सह तुलनात्मकमध्ययनमत्र भवति । अत्र पाणिनिसूत्रेषु समासप्रकरणे प्रयुक्तानां पारिभाषिकश्लिष्टशब्दानां समीक्षणं भवति। आवश्यकस्थलेषु तेषां शब्दानां तुलनात्मकमध्ययनमपि क्रियते। ये शब्दाः पाणिनिसूत्रेषु एकस्मिन्नर्थे प्रयुक्ताः, परन्तु संप्रति तेषां शब्दानां भिन्नोऽर्थः दृश्यते लोकव्यवहारे शास्त्रान्तरेषु च । यथा- अव्ययम्,उपपदम्,उपसर्जनम्,कर्मधारयः इत्यादयः ।

**कूटशब्दाः-**

अव्ययम्, उपपदम्, उपसर्जनम्, कर्मधारयः, तत्पुरुषः, धातु, द्वन्द्वः, द्विगुः, प्रातिपदिकम्, वहुब्रीहि, समर्थः, संज्ञा ।

**उपक्रमः-**

भाषाविज्ञानं भाषायाः समग्रमध्ययनं करोति। भाषाविज्ञानस्य प्रमुखानि अङ्गानि सन्ति- १. ध्वनिविज्ञानम्, २. पदविज्ञानम्/शब्दविज्ञानम्, ३. वाक्यविज्ञानम्, ४. अर्थविज्ञानम् ।

ध्वनिनां समन्वये पदं शब्दः वा निर्मितम् । अर्थविज्ञाने शब्दार्थयोः सम्बन्धादिविषये तथा अर्थपरिवर्त्तनस्य कारणविषये,अर्थस्य समकालीकं, ऐतिहासिकं, तुलनात्मकमध्ययनेन सह पर्यायवाचिशब्दानां नानार्थकानां शब्दानां, विलोमशब्दानां विवेचनं च क्रियते । भाषाविज्ञानस्य गौणाङ्गेषु कोष-विज्ञानमपि आगच्छति । अत्र एकार्थकानां अनेकार्थकानां विषमार्थकानां शब्दानां च व्याख्यानं क्रियते ।

**पारिभाषिकशब्दाः-**

अव्ययम्
उपपदम्
उपसर्जनम्
कर्मधारयः
तत्पुरुषः
धातुः
द्वन्द्वः

द्विगुः
प्रातिपदिकम्
वहुब्रीहिः
समर्थः
संज्ञा, इत्यादयः ।

**1. अव्ययम्-** (अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथाऽऽनुपूर्व्ययौगपद्यसादृश्य-सम्पत्तिसाकल्यान्तवचनेषु, अष्टा.२.१.६)

क्लि,पुं ,न + वि + इन् + अच् । शब्दकल्पद्रुमे[1] अस्य शब्दस्य अर्थो भवति – शब्दविशेषः तत् परे विभक्तिः न तिष्ठति, अतएव लिङ्गत्रयाविकृतम् ।

पुनः अस्य शब्दस्य अन्य एकः अर्थरस्ति परंव्रह्म। अनाद्यन्तं विकारशून्यं परंब्रह्म । परन्तु अस्य शब्दस्य पाणिनेः अभीष्टः अर्थमस्ति स्वरातिनिपातमव्ययम् ।[2]

**2. उपपदम् -** (तत्रोपपदं सप्तमीस्थम् अष्टा.३.१.९२)

वाचस्पत्ये अस्य शब्दस्य अर्थरस्ति – उपोच्चारितं पदम् । समीपोच्चारिते पूर्वमुच्चार्ये शब्दे ।[3] परन्तु अयं पाणिनेरभीष्टमर्थः नास्ति । पाणिनेः इप्सीतमर्थः भवति तत्रोपपदं सप्तमीस्थम् । काशिकावृत्यानुसारेण – तत्र एतस्मिन् धात्वाधिकारे तृतीये यत् सप्तमीनिर्द्दिष्टं तदूपपदं संज्ञं भवति ।

**3. उपसर्जनम्-** (प्रथमानिर्द्दिष्टं समास उपसर्जनम् अष्टा.१.२.४३)

उप+सृज् + ल्युट् । शब्दकल्पद्रुमे अस्य शब्दस्योऽर्थ भवति – प्रधानभिन्नं । तत्पर्यायः , अप्रधानम् ।

वाचस्पत्यानुसारेण अयं शब्दः दैवाद्युपद्रवे,अप्रधाने,गुणे,विशेषणे, संमार्गसाधने, प्रथमान्तपदनिर्द्दिष्टे अर्थे प्रयुज्यते ।[4] मनुस्मृत्यानुसारेण उपसर्जनस्य अर्थः भवति, विशेषणम्,त्यागः,उपद्रवः । यथा- अनाध्याय प्रकरणे मनुः –

**निर्घाते भूमिचलने ज्योतिसामुपसर्जने ।**

पुनः मनुनोक्तं- **उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते ।**[5]

परन्तु पाणिनेरभीष्टमर्थः भवति - समासशास्त्रे प्रथमानिर्द्दिष्टपदम् उपसर्जनसंज्ञं भवति। अतः भट्टोजिदीक्षितेनोक्तं- समासशास्त्रे प्रथमानिर्द्दिष्टमुपसर्जनसंज्ञं स्यात् । पुनः विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं संज्ञं स्यात् ।( एकविभक्ति चापूर्वनिपाते । अष्टा.१.२.४४)

**4. कर्मधारयः-**

अयं एकः पारिभाषिकशब्दः । भाषाशास्त्रे अस्य शब्दस्य प्रयोगः न दृश्यते । परन्तु व्याकरणे अयं एकः समासविशेषः । अस्य शब्दस्य अर्थः भवति तत्पुरुषः समानाधिकरणः कर्मधारयः ।अष्टा.१.२.४२

वाचस्पत्यानुसारेण अपि अस्य शब्दस्य अर्थः भवति - व्याकऱणोक्ते समानाधिकरण-पदधटिते समासाधीनलक्षणाशून्ये समासभेदे । तत् लक्षणादिकं शब्दे उक्तं यथा- क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थेबोधकं तादात्मेन,भवदेश समासः कर्मधारयः । समानविभक्त्यन्तं पदं समाधानिकरणमुच्यते । समानाधिकरणे पूर्वपदं

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

उत्तरपदं चोभयं समानविभक्त्यन्तं भवतः ।

**5. तत्पुरुषः-**

वाचस्पत्यानुसारेण अयं शब्दः समासभेदे उत्तरपदार्थप्रधानतत्पुरुष इति तस्य लक्षणम् । रुद्रभेदे, तस्य पुरुषः तदधिष्ठातृ देवच इत्येतेषु अर्थेषु व्यवह्रीयते यथा- तत्पुरुषाय विद्महे, महादेवाय धीमहि तन्नो रुद्रो प्रचोदयात् इति उच्यते ।[6] परन्तु पाणिनेः अभीष्टार्थः भट्टोजीना उक्तं यथा- तत्पुरुषः २.१.२२ इत्यस्मात् आरभ्यः शेषो बहुव्रीहिः २.२.२३ इत्येतत् यावत् मध्यवर्त्तीसूत्रैः यः समासः विधीयते , तं तत्पुरुषः उच्यते ।

**6. धातुः-** सुपोधातुप्रातिपादिकयोः (अष्टा.२.४.७९)

शब्दकल्पद्रुमानुसारेण अस्य शब्दस्य अर्थः भवति शरीरधारकवस्तूनि तद्यथा- कफः,वातः,पित्तम् ।[7] स्वर्णादिः इत्यमरभरतौ ।

परन्तु पाणिनेरभीष्टः अर्थः भवति भूवादयो धातवः । क्रियावाचिनः भ्वादयः धातुसंज्ञः स्युः।

**7. प्रातिपादिकम्** – प्रातिपद् +कालात् ठञ् ।

वाचस्पत्यानुसारेण अयं शब्दः प्रतिपदायां तिथौ भवे, तत्राविर्भूते वस्तौ ,नाम्नी शब्दभेदे च एतेषु अर्थेषु व्यवह्रीयते इति उक्तम् ।[8] शब्दकल्पद्रुमानुसारेण अयं शब्दस्य अर्थः भवति अग्निः । पाणिनिना अस्य शब्दस्य अर्थः अर्थवदधातुरप्रत्ययः प्रातिपादिकम् (अष्टा.१.२.४५) इति उक्तम् ।

**8. द्वन्द्वः-** चार्थे द्वन्द्वः (अष्टा.२.२.२९)

अमरकोषानुसारेण अस्य शब्दस्य अर्थः भवति द्वन्द्वं रहस्यं,[9] स्त्रीपुंसौ मिथुनं द्वन्द्वम्। द्वन्द्वं रहस्ये कलहे,युग्मयोः इति मेदिनी । वाचस्पत्यानुसारे अयं शब्दः कलहे,मिथुने, स्त्रीपुंसयो र्द्वये रोषभेदे,समासभेदे च,दुर्गे,युक्तिकलहे इत्येतेषु अर्थेषु शब्दः व्यवह्रियते ।

परन्तु एते पाणिनेरभीष्टमर्थाः न सन्ति । भट्टोजीदीक्षितेन उक्तम् – अनेकं सुबन्तं चार्थे वर्त्तमाने वा समस्यते स द्वन्द्वः । समुच्चयान्वाच्चयेतरेतरयोगसमाहारश्चार्थाः ।

**9. द्विगुः- संख्यापूर्वो द्विगुः ।** (अष्टा.२.१.५२)

वाचस्पत्यानुसारेण अयं शब्दः- द्वयोर्गवोः सम्बन्धिनि द्विगवस्वामिके पुरुषे, समासभेदे एतेषु अर्थेषु प्रयुज्यते । परन्तु पाणिनेः अभीष्टरर्थः केवलं समासभेदमेव भवति ।भट्टोजीना उक्तं - तद्धितार्थे उत्तरपदे समाहारे त्रिविधः संख्यापूर्वः द्विगुः स्यात् ।

**10. बहुव्रीहिः- शेषे बहुव्रीहिः ।** (अष्टा.२.२.२३)

व्याकरणशास्त्रे पाणिनेरभीष्टं भवति- द्वितीयाश्रिता. इत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः सः शेषः प्रथमान्तमित्यर्थः , अधिकारोऽयम् । अस्य अधिकारः शेष बहुव्रीहिः अष्टा.२.२.२३ इत्यस्मात् सुत्रात् आरभ्यः

द्वन्द्वः २.२.२९ इत्येतं सूत्रं यावत् वर्त्तते। अनयोः सूत्रयोः मध्ये यः समासः भवति तस्य बहुव्रीहिः संज्ञा भवति । यथा- अनेकमन्यपदार्थे बहुव्रीहिः । अर्थात् अनेकं प्रथमान्तमन्यपदार्थे वर्त्तमानं वा समस्यते सः बहुव्रीहिः । अयं शब्दः भाषाशास्त्रे लौकिकसाहित्ये अस्मिन्नेव अर्थे प्रयुज्यते ।

**11. समर्थः- समर्थः पदविधिः ।** अष्टा.२.१.१.

अत्र पदसम्बन्धि यो विधिः सः समर्थाश्रितो बोध्यः । समर्थस्य अर्थः अत्र यस्य सामर्थ्यमस्ति , सामर्थ्यस्य अनेके अर्थे सति अत्र - व्यपेक्षा,एकार्थिभावः च सामार्थ्यभावेन गृह्यते । व्यपेक्षायाः अर्थः भवति- आकांक्षा,योग्यता तथा संन्निधिः आशत्तिः वा । आकाङ्क्षायाः अर्थरस्ति- प्रतीतिपर्यवसानविरहः ।[10] योग्यता पदार्थानां परस्परसम्बन्धे वाधाभावः । आसक्तिः वुद्ध्यविच्छेदः[11] आकाङ्क्षा,आसक्तिः,योग्यता इत्येतेषां त्रयाणां एकत्रावस्थानं व्यपेक्ष्यामुच्यते । पृथक्पृथक्पदानां अर्थानां एकत्रोपस्थितिरेव एकार्थीभावः भवति ।

इत्थं भावेन व्यपेक्षां एकार्थीभावं च सामर्थमुच्यते ,सामर्थयुक्तानां समर्थनां पदानां समासः भवति । परन्तु शब्दकल्पद्रुमे सामर्थ्यस्य अर्थः भवति शक्तिष्ठः । अमरकोषे अस्य शब्दस्यार्थः भवति- समर्थयते । समर्थ्यते वा अर्थात् बलवान्,सम्बन्धयुक्तः अर्थः अनुकूलश्च।

**12.संज्ञा- दिक्संख्ये संज्ञायाम् ।** (अष्टा.२.१.५०)

सम् +ज्ञा +अङ् । अमरकोषे अस्य शब्दस्य अर्थो भवति – “संज्ञास्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ।“ तृतीयकाण्ड,नानार्थवर्ग,श्लोक-३३ । वाचस्पत्ये अयं शब्दः चेतनायां, बुद्धौ आख्यायां, हस्ताद्यैरर्थसूचनायां, गायत्र्यां, सूर्यपत्नीश्च इत्येतेषु अर्थेषु प्रयुज्यते इति उक्तम्। परन्तु अस्मिन् समाससूत्रे अयं शब्दः नाम इति अर्थे प्रयुज्यते ।

पाणिनिसूत्रेषु समासप्रकरणेषु एते पारिभाषिकशब्दाः सन्ति ये संप्रति पाणिनेः अभीष्टम् अर्थं न द्योतयन्ति। अन्येषु शास्त्रेषु संप्रति लोकव्यवहारे च तेषां शब्दानां भिन्नः अर्थोऽस्ति । अनेन प्रकारेण क्षुद्रं शोधपत्रमिदं समासप्रकरणे पाणिनीना प्रयुक्तानां श्लिष्टशब्दानां तथा पारिभाषिकशब्दानां भाषाविज्ञानदृष्ट्या शास्त्रान्तरेण सह तुलनात्मकमध्ययनं कृत्या एकं नूतनमालोकं पातयिष्यतीति आशासे ।

**पादटिप्पणी -**

1. शब्दकल्पद्रुम.रा.सं.सं.भाग-1.पृ-470
2. अष्टा.१.१.३६
3. वाचस्पत्य.रा.सं.स्.भाग-2.पृ-1224
4. वाचस्पत्यम्.रा.सं.स.भा-2.पृ-1336
5. मनु.स्मृ.9.211
6. वाचस्पत्यम्. रा.सं.सं.भा.4. पृ-3212
7. शब्दकल्पद्रुम.रा.सं.सं.भा-3.पृ-790
8. वाचस्पत्यम्.भाग-6.पृ-4523
9. अमरकोष.८.१.१५
10. साहित्यदर्पणः .परिच्छेदः-२.कारिका.१.

Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

11. तत्रैव

**सहायकग्रन्थसूची-**

१. ईश्वरचन्द्रः, (सं,) अष्टाध्यायी(प्रथमद्वितीयभागः,चौखम्बासंस्कृतप्रतिष्ठान,देहली,2009)
२. अमरकोषः, अभिमन्युश्रीमन्नालाल,चौखम्बाविद्याभवनम्,वाराणासी
३. वाचस्पत्यम् ,राष्ट्रियसंस्कृतसंस्थानम्,नवदेहली
४. साहित्यदर्पणम्,आचार्यशेषदेवशर्मा रेग्मी,चौखम्बाकृष्णदास अकादमी,वाराणासी
५. शब्दकल्पद्रुमः,राष्ट्रियसंस्कृतसंस्थानम्,नवदेहली
६. सिद्धान्तकौमुदी,गोविन्दाचार्यः,लक्ष्मीशर्मा,चौखम्बासुरभारतीप्रकाशनम्,वाराणासी
७. मनुस्मृतिः,पं.शास्त्रिहरगोवन्दः,चौखम्बा कृष्णदास अकादमी,वाराणासी